तत् त्वं पूषन् अपावृणु
केन्द्रीय विद्यालय संगठन

योऽनूचानः स नो महान्



# हैदराबाद् संभागः ।

## दशमी कक्षायाः

## संस्कृत - छात्राध्ययनसामग्री

प्रथमसत्रम् / I TERM

2021 - 2022


चेबिय्यं वेङ्कट रामय्यः ,
प्र.स्ना. शि. - संस्कृतम्
केन्द्रीय विद्यालयः नं .1 उप्पल् ।

पुरोवाक् "श्री मात्रे नम:" ।

महानयं प्रमोदस्य विषय: यत् " बालानां सुखबोधाय " विशिष्य दशमीकक्षाया: छात्राणां कृते संरचितेयं छात्राध्यायनसूक्ष्मसामग्री CBSE संस्थाया: नूतन पाठ्यक्रमानुसारं प्रथमसत्रस्य नवीनतमप्रश्नपत्रम् आधृत्य सरलशैल्या विलसति । " अ " इति भागेन चत्वारिंशत् ( 40 ) अंकानां कृते CBSE प्रथमसत्रस्य प्रश्नपत्र - प्रारूपम् ( Blue print ) अनुसृत्य विनिर्मिता इयं अध्ययनसामग्री । " अ - भागे " पञ्चविंशति ( 25 ) अंकानां कृते बहुलैच्छिक - प्रश्नै: ( MCQ's ) अनुप्रयुक्त - व्याकरणम् पञ्चदश ( 15 ) अङ्कै: पठितावबोधनं च दशप्रश्नेषु विद्येते । अत्र न केवलं प्रश्नोत्तराणि , अपितु अभ्यासार्थं प्रश्ना: अपि प्रदत्ता: । अस्यां सहायकसामग्र्यां प्रत्येकस्य प्रश्नस्य उत्तरं कथं लेखनीयम् इत्यपि संसूचितम् । अत्र व्याकरणबिन्दूनामुपरि विशेषावधानं प्रदत्तम् । दशमीकक्षाया: छात्रेभ्य: प्रथमसत्रे इयं संस्कृतसूक्ष्मसामाग्री कल्पतरुरिव वाञ्छिततफलप्रास्त्यै सहकरोतीति संभाव्यते । अवसरेऽस्मिन् अस्या: सामग्र्या: प्रणेतारं प्रियमित्रम् अस्माकं संस्कृतविभागे अन्यतमं प्रशिक्षित - स्नातक - शिक्षकं श्रीमन्तं चेबिय्यं वेंकटरामय्य महोदयं आशीर्भि: समतोषयितुं भगवन्तं हनूमन्तं संप्रार्थये ।

बुधजनविधेय:

डॉ. चिलुकूरि दुर्गाराव:

दिनांक: :- 26 - 07 - 2021 . प्रशिक्षित - स्नातक - शिक्षक: , के . वि . नं - 1 , उप्पल् , हैद्राबाद् ।

***********************************************************************************************************************

## कर्मणैव जयति पुरुष:

ॐ यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ गीता . 6 . 30 ॥

अस्मिन् संसारे कियन्त: मानवा: सन्ति ये जायन्ते मृत्युं च प्राप्य परलोकं गच्छन्ति । परन्तु कति जना: सन्ति ये तेषां विषये जानन्ति ? सम्भवत: अत्यल्पा: एव । यतोहि लोक: सर्वदा कर्मयोगिनाम् एव स्मरणं करोति । गीतायां श्रीकृष्णेन अस्मादेव कारणात् पूर्वमेव कथितं यत् - " योग: कर्मसु कौशलम् " इति । कक्षादशम्या: छात्राणां कृते सूक्ष्माध्ययन - सामग्र्या: निर्माणं स्वयमेव कठिनं कार्यं भवति । परन्तु कार्यमिदं CBSE - 2021 - 22 प्रथमसत्रस्य कृते निर्विघ्नं परिसमाप्य श्री रामय्या महोदय: " कर्मणैव जयति पुरुष: " इति वचनम् अन्वर्थमकरोत् । श्री वेंकट रामय्य महोदयस्य कठिनतरपरिश्रमेण दृढसंकल्पेन एव बालहितकार्योऽयं सुसम्पन्नो जात: । अस्या: सूक्ष्म - सामाग्र्या: निर्माणार्थं महोदयाय अहं धन्यवादान् ज्ञापयामि । अस्या: सामग्र्या: मुखपत्रस्य निर्माणं मया कृतमस्ति । मुखपत्रे अंकितं सुभाषितं विशेषरूपेण बालानां कृते एव योजितम् अस्ति । मूलसुभाषितम् अस्ति महाभारतस्य शल्यपर्वणि यथाहि -

" न हायनैर्न पलितै: न वित्तेन न बन्धुभि: । ऋषयश्चक्रिरे धर्मं योऽनूचान: स नो महान् ॥

ऋषिप्रोक्त: परम्पराप्राप्त: अनूचान: सनातन: धर्म एव अस्माकं महान् अस्ति । यश्च निरन्तराभ्यासेन अध्ययनेनैव प्राप्तुं शक्य: । यतोहि बालानां धर्मोऽपि निरन्तराध्ययनशीलता एवास्ति । अत: अहं चिन्तयामि यत् बालै: स्वाध्यायधर्मस्य पालनेन स्वमातृ - पितृ - गुरूणां मस्तकं गर्वेण गौरवोन्मुखं करणीयम् । उपरि लिखित: " यो मां पश्यति ...." इत्यादि गीताश्लोक: अमुमेवार्थं द्योतयति यत् भक्तिभावयुक्ता: भक्ता: यथा सर्वत्र ईश्वरमेव पश्यन्ति तथैव छात्रा: स्वज्ञानपिपासां शमयितुं अध्ययने अर्जुन इव लक्ष्यैकायत्तचित्ता: भवेयु: इति ।

श्रीमान् पङ्कज सिन्ह:

दिनांक: :- 26 - 07 - 2021 . प्रशिक्षित - स्नातक - शिक्षक: , केन्द्रीय विद्यालय: , करनाल: , गुरुग्राम सम्भाग:



# FORE WORD

**I am happy to know that I - TERM Sanskrit Micro Material of class X has been prepared by Mr. Ch V Ramaiah T.G.T. ( Sanskrit ) of this vidyalaya .**

**I am sure that this material will cater to the needs of class X Board going students and help them to score better and also to overcome their examination stress.**

**Since this Sanskrit Material is prepared as per the CBSE curriculum with the latest changes in the syllabus and I -TERM new pattern in the design of Question Paper for the academic year 2021 - 22, I am sure that this will benifit the Sanskrit students in I -TERM Board examination to a great extent .**

**In this connection I appreciate the Sanskrit Department of KV NO 1 , Uppal in general and Mr. Ch V Ramaiah T.G.T. ( Sanskrit ) in particular for his relentless efforts in bringing the Sanskrit Micro material .**

**छात्राध्ययनसामग्री इयं दशमी कक्षाया: छात्रेभ्य: वाञ्छितफलप्राप्त्यै सहयोगं प्रददाति इति दृढं विश्वस्यते ।**

दिनाङ्क: :- 26 - 07 - 2021.

( पि . श्रीनिवास राजु )
**प्राचार्य:**
के . वि . नं - 1 , उप्पल् , हैदराबाद् ।

# PREFACE

" अस्मदाचार्य - पर्यन्तां वन्दे गुरुपरम्पराम् " CH V RAMAIAH , T . G . T . ( Sanskrit )

I would like to express my gratitude to Shri. P. Srinivasa Raju Garu Principal and Vice Principal Smt. N Rajeswari who gave me moral support by writing the foreword and message for this Sanskrit Micro material for I TERM 2021 - 22.
It is because of their Motivation and support I could prepare Class X Sanskrit Micro Material as per the new CBSE pattern 2021 - 2022 ( I TERM ) for the benefit of Class X Students.

The model paper at the begining for I Term of the material as per the latest CBSE pattern ( I TERM 21 - 22 ) with key will boost the students' confidence. So , I request you all to follow the INDEX for I TERM Syllabus . Worksheets have been given with answers at the end of every lesson for practice.

While other subjects have ample study material , there has been a gap in the same for Sanskrit. Thus , it has been my dream to bridge that gap. I have voluntarily taken up task of preparing such useful material for Sanskrit students. The entire credit goes to My Principal Sir and Vice Principal mam.

I , personally thank Dr. Ch Durga Rao and Smt. Padmavathi mam , the scholars of our Sanskrit Department KV NO 1 , Uppal , Hyderabad Region for their timely suggestions and continuous monitoring of the material to come out .

I Thank my Sanskrit Brothers and Friends of HYDERABAD Region for their concern and encouragement .
I also thank Sanskrit Scholors from other Regions - ( Chennai ) Sri.Venkatesan , Sri Raghavendra Sharma , ( Ernakulam ) Sri Shibu , ( Bangolore ) Sri L M Bhat , Sri V V Bhat .

Special thanks to All India Sanskrit Teacher's friend Sri . Pankaj Singh , KV , Karnal , Gurugram Region for his support and encouragement throughout and for also designing the first page.

I seek blessings from my Sanskrit fraternity . Any errors may please be intimated to me for further corrections in the next edition.

I strongly believe that in this critical CORONA pandemic year, students will be benifitted by this self explanatory material to score more hundreds in Board Exam ( TERM I & II 2021 - 22 ) . I think this is the right time to practice and prepare for I TERM Exam . I wish all the best to the aspiring students .



# MESSAGE

**My sincere accolades to Shri CH Venkata Ramaiah , TGT Sanskrit , KV No 1 Uppal , for his relentless efforts in shaping I -TERM Class X Sanskrit Micro Material for the session 2021 - 2022 . I strongly believe that this Micro Material , in revised CBSE - 21 - 22 Pattern will be immensely beneficial to all the students who access it .**

**The initiative of Shri CH Venkata Ramaiah towards making students learn Sanskrit without complexities during this toughest pandemic situation is praise worthy .**

**I wish maximum Class X children reap the fruit of Mr. Ramaiah's hard work in learning Sanskrit through this Term wise - Question wise and Chapter wise - Sanskrit Micro Material.**

**My Best Wishes to Mr. CH V Ramaiah and his Students !**

N RAJESHWARI

दिनाङ्क: :- 26 - 07 - 2021.

VICE PRINCIPAL

KV NO 1 UPPAL
HYDERABAD .

K.V.NO-1 UPPAL . K.V.S. ( R.O. ) HYDERABAD . CLASS -10 . TERM I . SANSKRIT MICRO MATERIAL . CBSE - 2021 - 2022 .

कक्षा - दशमी । संस्कृतपाठ्यक्रम: - 2021 - 22 . ( कोड नं. 122 ) ( 24 / 07 / 2021 )

प्रथमसत्रस्य पाठ्यक्रम: C B S E प्रश्नपत्रप्रारूपम् च । प्रथमसत्रीय - मूल्यांकनम् - 40 अङ्का: + 10 आन्तरिक - मूल्याङ्क नम् = 50 ।

" अ " - भाग: ( बहुविकल्पात्मका: प्रश्ना: ) 40 अङ्का: अनुप्रयुक्त - व्याकरणम् - 25 अङ्का:

समयः :- सार्धहोरा पठितावबोधनम् - 15 अङ्का:

*****************************************************************************************************

CLASS - 10 . SANSKRIT . प्रथमसत्रस्य प्रश्नपत्रप्रारूपम् - 40 अङ्काः | C.B.S.E. BLUE PRINT - 2021 - 2022 .

अनुप्रयुक्त - व्याकरणम् - 25 अङ्का:

| प्रश्नः | प्रश्न - प्रकारा: पाठ्यबिन्दव: च \| | अङ्का: | पृ.सं |
|---|---|---|---|
| | " अ " - भाग: ( बहुविकल्पात्मका: प्रश्ना: ) 40 अङ्का: अनुप्रयुक्त - व्याकरणम् - 25 अङ्का: | | |
| | प्रथमसत्रस्य प्रश्नपत्रप्रारूपम् आदर्श - प्रश्नाः च \| I TERM EXAM BLUE PRINT OF 10 QUESTIONS | | 8 |
| | प्रथमसत्रस्य आदर्शप्रश्नपत्रम् उत्तरसहितं च I TERM EXAM MODEL PAPER WITH KEY . | | 9 / 12 |
| 1 | सन्धिकार्यम् :- * व्यञ्जनसन्धि: :- वर्गीय - प्रथमाक्षराणां तृतीयवर्णे परिवर्तनम् , वर्गीय - प्रथमवर्णस्य पञ्चमवर्णे परिवर्तनम् - 2<br>* विसर्गसन्धि :- विसर्गस्य उत्वम् , विसर्गस्थाने - स् , श् , ष् - 2 | 1 x 4 = 4 | 13 |
| 2 | समास: :- वाक्येषु समस्तपदानां विग्रह: विग्रहपदानां च समास: - * तत्पुरुष: - विभक्ति: ( 1 अङ्कः ) \|<br>* अव्ययीभाव:- ( अनु , उप , स / सह , निर् , प्रति , यथा ) ( 2 अङ्कौ ) \| * द्वन्द्व: इतरेतर ( 1 अङ्कः ) | 1 x 4 = 4 | 17 |
| 3 | प्रत्यया: :- * तद्धिता: - मतुप् , त्व - 3 अङ्काः * स्त्रीप्रत्यय: - टाप् - 1 अङ्क: | 1 x 4 = 4 | 20 |
| 4 | वाच्यपरिवर्तनम् :- केवलं लट् लकारे ( कर्तृ , कर्म , क्रिया ) - 3 | 1 x 3 = 3 | 22 |
| 5 | समय: - अङ्कानां स्थाने शब्देषु समयलेखनम् \| ( सामान्य , सपाद , सार्ध , पादोन ) - 4 | 1 x 4 = 4 | 27 |
| 6 | अव्ययपदानि ( 26 ) :- उच्चैः , च , श्व: , ह्य: , अद्य , अत्र - तत्र , यत्र - कुत्र , इदानीम् , अधुना , सम्प्रति , साम्प्रतम् , यदा , तदा , कदा , सहसा , वृथा , शनैः , अपि , कुत: , इतस्तत: , यदि - तर्हि , यावत् - तावत् । | 1 x 3 = 3 | 28 |
| 7 | अशुद्धि - संशोधनम् :- * वचन - लिङ्ग - पुरुष - लकार - दृष्ट्या संशोधनम् । | 1 x 3 = 3 | 33 |

* पठितावबोधनम् - 15 अङ्का:

| | | | |
|---|---|---|---|
| 8 | प्रश्ननिर्माणम् :- वाक्येषु रेखांकित - पदानि अधिकृत्य पञ्चप्रश्नानां निर्माणम् । प्रश्नवाचकपदानां चयनम् । | 1 x 5 = 5 | 36 |
| 9 | पर्यायपदानां , - विशेषण - विशेष्य पदानां वा मेलनम् , अथवा - वाक्येषु प्रयोग: । ( पाठान् आधृत्य लघूत्तरात्मका: प्रश्ना: । ) | 1 x 4 = 4 | 38 |
| 10 | भाषिक - कार्याय तत्त्वानि :- ( पाठाधारितानि वाक्यानि दीयन्ते ) -<br>* कर्तृ / क्रिया - पदचयनम् । * विशेषण - विशेष्य - पदचयनम् । * पर्याय / विलोम - पदचयनम् ।<br>( वाक्ये विद्यमानं शुद्ध - उत्तरपदम् निर्देशानुसारं प्रदत्त - विकल्पेभ्यः चित्वा लेखनीयम् भवति ) | 1 x 6 = 6 | 40 |

पाठ्य - पुस्तकम् - " शेमुषी - संस्कृत - पाठ्यपुस्तकम् - द्वितीय:भाग: । ( दशमश्रेण्यै ) CBSE द्वारा 2021 - 2022 ( 24 / 07 / 2021 ) परीक्षायै निर्धारिता: पाठा: :-

| पाठसंख्या | पाठस्य नाम | विषय: | पृष्ठ संख्या |
|---|---|---|---|
| प्रथम: पाठ: | शुचिपर्यावरणम् | पद्यात्मक: | 43 |
| द्वितीय: पाठ: | बुद्धिर्बलवती सदा | गद्य - पद्यमय: | 47 |
| ** चतुर्थः पाठः ADDED | शिशुलालनम् | नाट्यांश: | 51 |
| पञ्चम: पाठ: | जननी तुल्यवत्सला | गद्यात्मक: | 57 |

अवधातव्यम् :-

अनुप्रयुक्तव्याकरणस्य अंशानां चयनं यथासम्भवं 'शेमुषी' पाठ्यपुस्तकात् करणीयम् |

यदि ततः न सम्भवति तर्हि 'अभ्यासवान् भव - द्वितीयो भागः' इत्यस्मात् कर्तुं शक्यम् |

सूचना :- प्रथमसत्रे पठित / अपठित - गद्य / पद्य / नाट्यांश - आधारेण एकपदेन तथा पूर्णवाक्येन उत्तरत इति प्रश्नद्वयं परीक्षार्थं नास्ति |
परन्तु प्रथमसत्रस्य चतुर्णां पाठानां कार्यपत्रेषु विषयदृढीकरणार्थं एकपदेन तथा पूर्णवाक्येन उत्तरत - इति प्रश्नाः दत्ताः | पाठान्ते उत्तराणि अपि दत्तानि |

पाठ्य - पुस्तकम् -

1. " शेमुषी - संस्कृत - पाठ्यपुस्तकम् - द्वितीय:भाग: । संशोधित - संस्करणम् ( प्रकाशनम् रा.शै.अनु.प्र.परि. द्वारा )
2. " अभ्यासवान् भव " भाग: - 2 ( प्रकाशनम् रा.शै.अनु.प्र.परि . द्वारा )
3. " व्याकरणवीथि: " ( अतिरिक्तपठानार्थम् ) ( प्रकाशनम् रा.शै.अनु.प्र.परि. द्वारा )

********************************************************************************************************************

TERM - I . प्रथमसत्रस्य आदर्शप्रश्नपत्रप्रारूपम् प्रश्नाः च - 2021 - 2022 . 40 अङ्काः + 10 आन्तरिक - मूल्याङ्कनम् = 50 ।

समयः :- सार्धघण्टा "अ" - भाग: ( बहुविकल्पात्मका: प्रश्ना: ) 40 अङ्का: अनुप्रयुक्त - व्याकरणम् - 25 अङ्का:

| प्र.सं. | प्रश्नाः ( प्रथमसत्रस्य पाठेभ्यः / FROM I Term 4 LESSONS ) | अङ्काः |
|---|---|---|
| 1 | अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिविच्छेदं वा प्रदत्त-विकल्पेभ्य: चित्वा लिखत । ( केवलं प्रश्नचतुष्टयम् ) | 1 x 4 = 4 |
| 2 | अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत । ( केवलं प्रश्नचतुष्टयम् ) | 1 x 4 = 4 |
| 3 | अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत । ( केवलं प्रश्नचतुष्टयम् ) | 1 x 4 = 4 |
| 4 | वाच्यस्य नियमानुगुणम् उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत । ( केवलं प्रश्नत्रयम् ) | 1 x 3 = 3 |
| 5 | प्रदत्त - विकल्पेभ्य: समुचितं कालबोधशब्दं चिनुत - ( केवलं प्रश्नचतुष्टयम् ) | 1 x 4 = 4 |
| 6 | वाक्यानुगुणम् उचिताव्ययपदं चिनुत - ( केवलं प्रश्नत्रयम् ) | 1 x 3 = 3 |
| 7 | अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति । शुद्धं पदं विकल्पेभ्य: चिनुत - ( केवलं प्रश्नत्रयम् ) | 1 x 3 = 3 |

पठितावबोधनम् - 15 अङ्का: ( प्रथमसत्रस्य पाठेभ्यः / FROM I Term 4 LESSONS )

| | | |
|---|---|---|
| 8 | रेखाङ्कि त - पदानि आधृत्य प्रदत्त - विकल्पेभ्य: समुचितं प्रश्नवाचकपदं चिनुत - ( केवलं प्रश्नपञ्चकम् ) | 1 x 5 = 5 |
| 9 | अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकूलम् उचितार्थं चिनुत - ( केवलं प्रश्नचतुष्टयम् ) | 1 x 4 = 4 |
| 10 | भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं प्रदत्त - विकल्पेभ्य: चिनुत - ( केवलं प्रश्नषट्कम् ) | 1 x 6 = 6 |

*

## अभ्यासप्रश्नपत्रम् - 1. As per I - TERM CBSE new pattern - 2021 - 2022 .

कक्षा : दशमी CODE ( 122 ) संस्कृतम् SANSKRIT

अवधि: : सार्धघण्टा ( 1 hr 30 mnts ) पूर्णाङ्का: - 40

### "अ" भाग: ( PART – 1 ) ( बहुविकल्पात्माका: प्रश्ना: ) 40 अंका: ।

## खण्ड: - " क " ( SECTION - A ) अनुप्रयुक्त - व्याकरणम् - 25 अंका:

1. अधोलिखितवाक्येषु रेखाखाङ्कितपदस्य सन्धिपदं सन्धिविच्छेदं वा प्रदत्त - विकल्पेभ्य: चित्वा लिखत । ( केवलं प्रश्नचतुष्टयम् ) 1 x 4=4

i ) सर्वदा सत् + मार्गे गच्छेत् । ( क ) सद्मार्गे ( ख ) सन्मार्गे ( ग ) सत्मार्गे

ii ) आलस्यं हि शरीरस्थो महान् रिपु: । ( क ) शरीरस्थ + महान् ( ख ) शरीरस्था + महान् ( ग ) शरीरस्थ: + महान्

iii ) हरिं वन्दे जगद्गुरुम् । ( क ) जगत् + गुरुम् ( ख ) जगद् + गुरुम् ( ग ) जगति + गुरुम्

iv ) अयम् एक: + तावत् विभज्य भुज्यताम् । ( क ) एकतावत् ( ख ) एकस्तावत् : ( ग ) एकश्तावत्

v ) क: + चित् कृषक: बलीवर्दाभ्यां क्षेत्रकर्षणम् कुर्वन्नासीत् । ( क ) केचित् ( ख ) कश्चित् ( ग ) काचित्

2. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत । ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

i ) कुसुमावलि: समीरचालिता स्यान्मे वरणीया । ( क ) कुसुमा: आवलि: ( ख ) कुसुमेषु आवलि: ( ग ) कुसुमानाम् आवलि:

ii ) सदा परेषाम् उपकारः करणीयः । ( क ) परापकारः ( ख ) परेणापकारः ( ग ) परोपकारः :

iii ) तत्र पिककाकौ उड्डीयेते । ( क ) पिक: च काका: च ( ख ) पिक: च काक: च ( ग ) काक: पिक: च

iv ) छात्र: परीक्षायै यथाशक्ति पठति । ( क ) शक्ते: योग्यम् ( ख ) शक्तिम् यथा ( ग ) शक्तिम् अनतिक्रम्य

v ) राम: मृगस्य पश्चात् धावति स्म । ( क ) अनुमृगम् ( ख ) समृगम् ( ग ) उपमृगम्

3. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति - प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत । ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

i ) करोना काले मानवत्वं दृश्यते । ( क ) मानव + मतुप् ( ख ) मानव + टाप् ( ग ) मानव + त्व

ii ) हरिततरूणां ललितलतानां माला रमणीया । ( क ) रमण + ईया ( ख ) रमणीय + टाप् ( ग ) रमणीय + त्व

अथवा

लोकेऽस्मिन् धन + मतुप् जनाः एव सुखम् अनुभवन्ति । ( क ) धनवान् ( ख ) धनवन्तः : ( ग ) धनवन्तौ

iii ) बुद्धिमन्तौ छात्रौ स्वयं पठतः । ( क ) बुद्धि + टाप् ( ख ) बुद्धि + त्व ( ग ) बुद्धि + मतुप्

iv ) शिक्षक + टाप् कक्षामध्ये पाठयति । ( क ) शिक्षका ( ख ) शिक्षिका ( ग ) शिक्षणम्

4. वाच्यस्य नियमानुगुणम् उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत । ( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

रमा - त्वं कुत्र गच्छसि ?

सीता - अहं तु आपणं ( i ) ................ । ( क ) गच्छति ( ख ) गच्छामि ( ग ) गच्छसि

| | | | | |
|---|---|---|---|---|
| रमा - | तत्र ( ii ) ................ किमर्थं गम्यते ? | ( क ) त्वं | ( ख ) मया | ( ग ) त्वया |
| सीता - | अहं तत्र ( iii ) ............. क्रेतुं गच्छामि । | ( क ) वस्त्राणि | ( ख ) फलानि | ( ग ) पुष्पाणि |
| रमा - | ( iv ) ............ अपि तत: फलानि क्रेतव्यानि । | ( क ) अहं | ( ख ) त्वं | ( ग ) मया |

5. प्रदत्त - विकल्पेभ्य: समुचितं कालबोधशब्दं चिनुत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

| | | | | |
|---|---|---|---|---|
| i ) | विकास: प्रात: 9:30 ................ वादने विद्यालयं गच्छति । | ( क ) सपाद नव | ( ख ) सार्धनव | ( ग ) पादोन नव |
| ii ) | स: नित्यं 7:15 ................ वादने भ्रमणाय गच्छति । | ( क ) सप्त | ( ख ) सार्धसप्त | ( ग ) सपादसप्त |
| iii ) | गौरव: प्रात: 8:00 ................ वादने पूजां करोति । | ( क ) अष्ट | ( ख ) सपाद अष्ट | ( ग ) पादोन अष्ट |
| iv ) | सुरभि: सायं 5:30 ................ वादने भ्रमति । | ( क ) चतुर् | ( ख ) सार्ध-पञ्च | ( ग ) सपादपञ्च |
| v ) | देवदत्त: रात्रौ 9:45 ................ वादने वार्ता: श्रुणोति । | ( क ) पदोन नव | ( ख ) सपाद नव | ( ग ) पादोन दश |

6. वाक्यानुगुणम् उचिताव्ययपदं चिनुत - ( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

| | | | | |
|---|---|---|---|---|
| i ) | रमा .................. अशोकनगरं गमिष्यति । | ( क ) च | ( ख ) श्व: | ( ग ) ह्य: |
| ii ) | .................. वृष्टि: भवति । | ( क ) इतस्तत: | ( ख ) इदानीं | ( ग ) श्व: |
| iii ) | .................. विदधीत न क्रियाम् । | ( क ) शनै: - शनै: | ( ख ) सहसा | ( ग ) इतस्तत: |
| iv ) | सुरेश: तु .................. भ्रमति । | ( क ) कुत्र | ( ख ) उच्चै: | ( ग ) इतस्तत: |

7. अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति । शुद्धं पदं विकल्पेभ्य: चिनुत - ( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

| | | | | |
|---|---|---|---|---|
| i ) | सुरेश: <u>नेत्रयो:</u> पश्यति । | ( क ) नेत्राभ्याम् | ( ख ) नेत्रेषु | ( ग ) नेत्रेभ्य: |
| ii ) | पाठ्यपुस्तके अष्ट <u>पाठानि</u> सन्ति । | ( क ) पाठे | ( ख ) पाठा: | ( ग ) पाठान् |
| iii ) | ते <u>बालिका:</u> विद्यालयं गच्छन्ति । | ( क ) बालिके | ( ख ) बालका: | ( ग ) बालकौ |
| iv ) | सुधा ह्य: आपणं <u>गच्छामि</u> । | ( क ) गमिष्यामि | ( ख ) गच्छेयम् | ( ग ) अगच्छत् |

## खण्ड: - ख ( SECTION - B ) पठित अवबोधनम् - 15 अङ्का:

8. रेखाङ्कित त - पदानि आधृत्य प्रदत्त - विकल्पेभ्य: समुचितं प्रश्नवाचकपदं चिनुत - ( केवलं प्रश्नपञ्चकम् ) 1 x 5 = 5

| | | | | |
|---|---|---|---|---|
| i ) | व्याघ्रं दृष्ट्वा धूर्त: शृगाल: अवदत् । | ( क ) क: | ( ख ) केन | ( ग ) कं |
| ii ) | शकटीयानं कज्जलमलिनं धूमं मुञ्चति । | ( क ) कीदृश: | ( ख ) कीदृशं | ( ग ) कीदृशीं |
| iii ) | स कृच्छ्रेण भारम् उद्वहति । | ( क ) केन | ( ख ) कासां | ( ग ) कदा |
| iv ) | कुशलवौ रामं उपसृत्य प्रणमतः । | ( क ) के | ( ख ) कः | ( ग ) कौ |
| v ) | तपोवने लवकुशयोः पितुः नाम न व्यवह्रियते । | ( क ) कथं | ( ख ) कुत्र | ( ग ) किमर्थं |
| vi ) | धेनूनां माता सुरभिः आसीत् । | ( क ) केषां | ( ख ) केभ्यः | ( ग ) कासां |

9. अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकूलम् उचितार्थं चिनुत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

| | | | | |
|---|---|---|---|---|
| i ) | गच्छ त्वमपि किञ्चित् गूढप्रदेशम् । | ( क ) गुप्तप्रदेशम् | ( ख ) नगरम् | ( ग ) ग्रामम् |
| ii ) | वयस्य , अपूर्वं खलु नामधेयम् । | ( क ) वृद्ध ! | ( ख ) पथिक ! | ( ग ) मित्र ! |
| iii ) | धरातलं दूषितम् अस्ति अतः कविः प्रकृतेः शरणम् इच्छति । | ( क ) शोभां | ( ख ) आश्रयं | ( ग ) शरं |
| iv ) | बालभावात् हिमकरः पशुपतिमस्तके विराजते । | ( क ) सूर्यः | ( ख ) नक्षत्रं | ( ग ) चन्द्रः |
| v ) | दुर्बले सुते मातुः अधिका कृपा भवति । | ( क ) क्रोधः | ( ख ) दया | ( ग ) पुत्रिका |

10. भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं प्रदत्त - विकल्पेभ्य: चिनुत - ( केवलं प्रश्नषट्कम् ) 1 x 6 =6

( i ) " दुर्दान्तैर्दशनै: अमुना स्यान्नेव जनग्रसनम् " इत्यस्मिन् वाक्ये " विशेषणपदं " इति किमस्ति ?

( क ) दुर्दान्तैः ( ख ) दशनैः ( ग ) जनग्रसनम्

( ii ) " स: दीन: इति जानन्नपि कृषक: तं पीडयति " इत्यस्मिन् वाक्ये क्रियापदं किं प्रयुक्तम् ?

( क ) जानन् ( ख ) पीडयति ( ग ) कृषक:

( iii ) " भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्त: शृगाल: हसन्नाह - " इत्यस्मिन् वाक्ये विशेषणपदं किंम् ?

( क ) व्याघ्रं ( ख ) भयाकुलं ( ग ) आह

( iv ) " वृषभः दीनः इति जानन्नपि सः तं नुद्यमानः आसीत् " इत्यस्मिन् वाक्ये " दीनः " इति पदस्य विशेष्यपदं किमस्ति ?

( क ) वृषभः ( ख ) नुद्यमानः ( ग ) सः

( v ) " तपोवनवासिनः कुशस्य मातरं देवी इति नाम्ना आह्वयन्ति ? " इत्यस्मिन् वाक्ये कर्तृपदं किमस्ति ?

( क ) देवी ( ख ) आह्वयन्ति ( ग ) तपोवनवासिनः

( vi ) " लोके महतो भयात् बुद्धिमान् मुच्यते " इत्यस्मिन् वाक्ये " मूर्खः " इति पदस्य विलोमपदं किमस्ति ?

( क ) भयात् ( ख ) बुद्धिमान् ( ग ) महतः

( vii ) " अत्र जीवितं दुष्करं जातम् " इत्यस्मिन् वाक्ये " कठिनं " इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

( क ) जातं ( ख ) जीवितं ( ग ) दुष्करं

**********************************************************************************************************************************************************

प्रथमसत्रस्य अभ्यासप्रश्नपत्रम् - 1 . उत्तराणि । KEY . CBSE - 2019 -2020 ( HYDERABAD )

Modified as per JULY new pattern 2021 - 2022 . कक्षा - दशमी | CODE ( 122 ) संस्कृतम् SANSKRIT पूर्णांका: 40

" अ " भाग: ( PART – 1 ) ( बहुविकल्पात्माका: प्रश्ना: ) 40 अङ्का: खण्ड: - " क " ( SECTION - A ) अनुप्रयुक्त - व्याकरणम् - 25 अङ्का:

1. सन्मार्गे , शरीरस्थ: + महान् , जगत् + गुरुम् , एकस्तावत् , कश्चित् ।
2. कुसुमानाम् आवलि: , परोपकारः , पिक: च काक: च , शक्तिम् अनतिक्रम्य , अनुमृगम् ।
3. मानव + त्व , रमणीय + टाप् , धनवन्तः , बुद्धि + मतुप् , शिक्षिका ||
4. गच्छामि , त्वया , फलानि , मया ।
5. सार्धनव , सपादसप्त , अष्ट , सार्धपञ्च , पादोनदश ।
6. i. श्व: , ii. इदानीं , iii. सहसा , iv. इतस्तत: ।
7. नेत्राभ्याम् , पाठा: , बालका: , अगच्छत् ।

खण्ड: - ख ( SECTION - B ) पठित अवबोधनम् - 15 अङ्का:

8. कं , कीदृशं , केन , कौ , कुत्र , कासां ।
9. = गुप्तप्रदेशम् , = मित्र ! , = आश्चर्यं , = चन्द्रः , = दया |
10. दुर्दान्तैः , पीडयति , भयाकुलं , वृषभः , तपोवनवासिनः , बुद्धिमान् , दुष्करं ।

**********************************************************************************************************************************************************

प्रथमसत्रस्य पाठ्यसामग्री :- अत्र CBSE प्रश्न - संख्यानुसारं पाठ्यसामग्री प्रदत्ता |

प्रथमं पाठ्यबिन्दूनां विवरणं अभ्यास: च । तत: पाठानां पाठ्यसामग्री दीयते ।

**************************************************************************************************************************************

Q.NO.1. सन्धि - कार्यम् | - 4 अङ्का: पदद्वयो: मेलनं सन्धि: | ( X ) + ( Y ) = ( Z )

प्रथमपदस्य अन्तिम: वर्ण: :- पूर्ववर्ण: ( X ) कथ्यते तथा

उत्तर / द्वितीयपदस्य प्रथमवर्ण: :- परवर्ण: ( Y ) कथ्यते |

पूर्ववर्ण: ( X ) + परवर्ण: ( Y ) = ( X & Y ) द्वयो: वर्णयो: स्थाने परिवर्तनं / आदेश: ( Z वर्ण: ) भवति |

यथा :- विद्या + आलय: = विद्यालय: ( X आ + Y आ = Z आ | X & Y combination is Very important .

Ex :- सुर + इन्द्र: = सुरेन्द्र: ( अ + इ = ए ) ( शतृवत् आदेश: अर्थात X & Y के स्थान पर 'ए' )

**************************************************************************************************************************************

क ) व्यञ्जन - सन्धि: :- 2 अङ्का: |

| | | | | | | |
|---|---|---|---|---|---|---|
| 1) जश्त्व | पूर्ववर्ण: X ( वर्गस्य-1 वर्ण: ( क् / च् / ट् / त् / प् ) | + | परवर्ण: Y ( कोऽपि स्वर: / वर्गस्य - 2 / 3 / 4 वर्णा: / श् , ष् , स् | = | आदेश: Z ( X वर्ण - वर्गस्य तृतीय: वर्ण: ( ग् / ज् / ड् / द् / ब् ) | यथा :- तत् + अत्र = तदत्र |
| नियम: :- ( X ) वर्गप्रथमवर्णस्य वर्गतृतीयवर्णे परिवर्तनम् ( = Z ) । ( जश्त्व - सन्धि: :- Z = जबगडदश् ) Hence based on Z जश् name of the सन्धि: | | | | | | | |

अभ्यास: :- उपरि कथित / दर्शित - नियमानुसारम् अधोलिखित - पदेषु सन्धिं कुरुत -

1) जश्त्व - उपरि प्रदत्त - नियमं अवगम्य ( समझकर ) अधोलिखित सन्धि - विच्छेद - पदानाम् उत्तराणि स्वयं लिखत -

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| यथा :-जगत् | + | ईश: | = जगदीश: | वाक् | + | अर्थ: | = ....... ग ....... | अच् | + | अन्त: | = ... ज ... |
| इट् | + | अन्त: | = ........ ड ...... | सुप् | + | अन्त: | = ...... ब ....... | अप् | + | जम् | = ... ब्ज .... |
| षट् | + | आनन: | = ..... डा ..... | तत् | + | अत्र | = ...... द ....... | तत् | + | धनम् | = ... द्ध .... |
| दिक् | + | गज: | = ...... ग्ग ...... | जगत् | + | गुरु: | = .... द् गु ...... | अस्मत् | + | वचनम् | = ... द्व .... |

| | | | | | | |
|---|---|---|---|---|---|---|
| 2) अनुनासिक | पूर्ववर्ण: X वर्गस्य - 1 वर्ण: ( क् / च् / ट् / त् / प् ) | + | परवर्ण: Y वर्गस्य - 5 वर्ण: | = | आदेश: Z X वर्ण- वर्गस्य पञ्चम: वर्ण: ( ङ् ञ् ण् न् म् ) | यथा :- जगत् + माता = जगन्माता |
| नियमः :- ( X ) वर्गप्रथमवर्णस्य वर्गपञ्चमवर्णे परिवर्तनम् ( = Z ) ।<br>अनुनासिकसन्धिः :- Z = ङ , ञ , ण , न , म ) Hence based on Z name of the सन्धि: । | | | | | | |

अभ्यास: :- उपरि कथित / दर्शित - नियमानुसारम् अधोलिखित - पदेषु सन्धिम् कुरुत -

2) अनुनासिक - उपरि प्रदत्त - नियमं अवगम्य ( समझकर ) अधोलिखित सन्धि - विच्छेद - पदानाम् उत्तराणि स्वयं लिखत -

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| यथा :-जगत् | + | माता | = जगन्माता | वाक् | + | मयम् | = ... ङ्म ..... | षट् | + | नवति: | = .... ण्ण ..... |
| जगत् | + | नाथ: | = .... न्ना .... | स्यात् | + | मे | = .... न्मे .... | तत् | + | निवास: | = ... न्नि ..... |
| सत् | + | मतिम् | = .... न्म ... | वाक् | + | मन: | = .... ङ्म ..... | अप् | + | मयम् | = ... म्म ..... |

**********************************************************************************************************************************************

ख ) विसर्ग - सन्धि: :- 2 अङ्का: । विसर्गस्य - क) उत्वम् , ख) सत्वम् , ग) शत्वम् , ग) षत्वम् ।

X विसर्गस्य = Z उत्वम् & ( Y ऽ ) यथा :- राम: + गच्छति = रामो गच्छति & राम: + अपि = रामोऽपि ।

X विसर्गस्य = Z सत्वम् यथा :- नमः + ते = नमस्ते ।

X विसर्गस्य = Z शत्वम् यथा :- कः + चन = कश्चन ।

X विसर्गस्य = Z षत्वम् यथा :- धनुः + ठङ्कार: = धनुष्ठङ्कारः ।

| | | | | | | |
|---|---|---|---|---|---|---|
| क) उत्वम् | X अ: | + | Y वर्गस्य - 3 / 4 / 5 / य् / र् / ल् / व् / ह् ( 20 वर्णाः ) | = | Z 1) ( x ) : - उ ( अ + उ = ओ | यथा :- राम: + गच्छति = रामो गच्छति |

* &

| | | | | | | |
|---|---|---|---|---|---|---|
| उत्वं+ ऽ | X अ: | + | Y अ ( 1 वर्णः ) | = | Z 2) (x) : - उ ( अ + उ = ओ & (Y) अ = ऽ ( अवग्रह: ) | यथा :- स : + अपि = सोऽपि |

अभ्यास: :- मान: + हि = ......... सिंह: + गर्जति = ....... गर्दभ: + वहति = ............ आचार्य: + वदति = .....

स: + अपि = सोsपि राम: + गच्छति = रामो गच्छति क: + अपि = ........ जन: + अत्र = .....

********************************************************************************************

| | | | | | | |
|---|---|---|---|---|---|---|
| ख) सत्वम् | X कोऽपि स्वरः + " : " | + | Y स्, त् ,थ् | = | Z X ( : ) स्थाने - स् | यथा :- मन: + तु = मनस्तु / कवि : + तु = कविस्तु / नि : + संदेह: = निस्सन्देह: |

अभ्यासः - :- भक्त : + सेवते = भक्तस्सेवते नम: + ते = नमस्ते मन: + संकल्प: = .....................

गुरु: + साक्षात् = ..... दु: + संग: = ........... सर: + तीर्त्वा = .....................

************************************************************************************************

| | | | | | | |
|---|---|---|---|---|---|---|
| ग) शत्वम् | X कोऽपि स्वरः + " : " | + | Y श् , च् , छ् | = | Z X ( : ) स्थाने श् | यथा :- का: + चन = काश्चन / मृग: + चलति = मृगश्चलति / |

अभ्यासः :- जन: + शोभते = जनश्शोभते क: + चित् = कश्चित् क: + चन = ................

जन: + चिनोति = .............. मन: + शान्ति: = ............. छात्र: + शीघ्रम् = ................

का: + चन = .............. कवि: + शोभते = .............. नि: + चल: = ................

************************************************************************************************

| | | | | | | |
|---|---|---|---|---|---|---|
| ग) षत्वम् | X कोऽपि स्वरः + " : " | + | Y ष् / ट् / ठ् | = | Z X ( : ) स्थाने ष् | यथा :- धनु: + टङ्कारः = धनुष्टङ्कारः / जनाः + टङ्कशालां = जनाष्टङ्कशालां |

अभ्यासः - राम: + टीकते = राम ... कते नि: + ठुर: = .........................

****************************************************************************************************************

सूचना :- सर्वदा सन्धिकार्ये पूर्ववर्णः कः ( x ) ? + परवर्णः कः ( Y ) ? इति विचार्य एव = नियमनुसारं आदेशस्य Z ( x / x & Y ) स्थाने कः वर्णः भवति / कौ वर्णौ भवतः इति चिन्तयित्वा प्रदत्त - विकल्पेभ्यः शुद्धोत्तरस्य चयनं कुर्वन्तु |

OR Z आदेशस्य स्थाने = x वर्णः कः भवति / ओर x + Y वर्णौ कौ भवतः इत्यपि विचार्य विकल्पेभ्यः शुद्धोत्तरस्य चयनं कुर्वन्तु |

****************************************************************************************************************

कक्षा - दशमी | प्रथमः पाठः | शुचिपर्यावरणम् | TEXT अभ्यासाः | सूचना :- TEXT अभ्यासेषु CBSE - आधारित - प्रश्नाः एव अत्र अभ्यासाय स्वीकृताः |

****************************************************************************************************************

पाठः - 1. 3. Q.1. सन्धिं / सन्धिविच्छेदं कुरुत - ख. स्यात् + .... = स्यान्न ङ. ..... + नगरात् = अस्मान्नगरात् | उत्तराणि :- ख. + न , ङ. अस्मात् +

पाठः - 2. 5. Q.1. सन्धिं / सन्धिविच्छेदं कुरुत - ग. ........ = अन्यः + अपि | उत्तराणि :- ख. अन्योऽपि |

पाठः - 4. 7. Q.1. ( क ) अधोलिखितेषु सन्धिं कुरुत - ग. कः + अत्र = ........ घ. अनभिज्ञः + अहम् = ............ | उत्तराणि :- ग. कोऽत्र घ. अनभिज्ञोऽहं

****************************************************************************************************************

## Q.NO.2. समासः - 4 अङ्काः

पाठ्य - वस्तु :- समासः :- 1. * तत्पुरुषः - विभक्तिः - ( 1 अङ्कः ) 2. अव्ययीभावः- ( अनु , उप , स / सह , निर् , प्रति , यथा ) - ( 1 ) 3. * द्वन्द्व - ( 1 अङ्कः ) *

| | |
|---|---|
| समासः | " संक्षिप्तीकरणम् समासः " = अर्थयुक्त दो या अधिक शब्दों के मेल से नए शब्द बनाने की क्रिया को समास कहते हैं \| इस विधि से बने शब्दों को समस्तपद कहते हैं \| |

जब परस्पर संबन्ध रखने वाले दो - या दो से अधिक स्वतन्त्र सार्थक शब्दों को संक्षिप्तरूप दिया जाता है तो वह समास कहलाता है |
जैसे - गंगाजल , रामावतार , प्रश्नोत्तर आदि | वास्तव में , कम से कम शब्दों में अधिक अर्थ प्रकट करना ही समास का मुख्य प्रयोजन है |

| हिन्दी में | 1. पदानां संयोजनम् = समासः समस्तपदम् | 2. समस्तपदानां पृथक्करणम् = विग्रहवाक्यम् पूर्वपदम् उत्तरपद | 3. समासस्य नाम |
|---|---|---|---|
| जैसे :- विद्या का अर्थी | विद्यार्थी | विद्यायाः अर्थी | षष्ठी - तत्पुरुषः |
| लोक में प्रिय | लोकप्रियः | लोके प्रियः | सप्तमी - तत्पुरुषः |
| राष्ट्रपति का भवन | राष्ट्रपतिभवनम् | राष्ट्रपतेः भवनम् | षष्ठी - तत्पुरुषः |
| शक्ति के अनुसार | यथाशक्ति | शक्तिम् अनतिक्रम्य | अव्ययीभावः |
| लोगों का नहीं रहना | निर्जनम् | जनानाम् अभावः | अव्ययीभावः |

| | | | |
|---|---|---|---|
| माता और पिता | मातापितरौ | माता च पिता च | द्वन्द्वः |
| राम और कृष्ण | रामकृष्णौ | रामः च कृष्णः च | द्वन्द्वः |

1. तत्पुरुषः - ( उत्तरपद - प्रधानः समासः तत्पुरुषः । समस्तपदानां पृथक्करण - समये पूर्वपदे विभक्तिः भवति , अतः - विभक्ति - तत्पुरुषः समासः

जहां उत्तर पद प्रधान होता है , वहां तत्पुरुष समास होता है | उत्तरपद के कारण पूर्वपद में विभक्ति लगती है तो उसे विभक्ति - तत्पुरुष समास कहते हैं |

1 ) विभक्ति - तत्पुरुषः :- उत्तर - पद - आधारेण पूर्वपदे या विभक्तिः भवति , तया विभक्त्या तत्पुरुष - समासस्य नाम भवति ।

परीक्षायै अभ्यासः :- Q.NO.2.अधोलिखित - वाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्त - विकल्पेभ्यः चित्वा लिखत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

| | | | | |
|---|---|---|---|---|
| 1. | गृहगतः बालकः प्रसन्नः भवति । | अ ) गृहेण गतः | ब ) गृहं गतः | स ) गृहस्य गतः |
| 2. | राजा जनेभ्यः हितं करोति \| | अ ) जनहितं | ब ) जनेभ्यः हितं | स ) जनानां हितं |
| 3. | व्याघ्रभीतः बालकः उच्चैः रुदति \| | अ ) व्याघ्रस्य भीतः | ब ) व्याघ्रं भीतः | स ) व्याघ्रात् भीतः |
| 4. | L . I. C. संस्था जीवनस्य रक्षां करोति \| | अ ) जीवनं रक्षां | ब ) जीवनस्य रक्षां | स ) जीवनरक्षाम् |
| 5. | कालिदासः शास्त्रनिपुणः आसीत् \| | अ ) शास्त्र निपुणः | ब ) शास्त्रं निपुणः | स ) शास्त्रेषु निपुणः |
| 6. | लोके मात्रा सदृशः देवः नास्ति \| | अ ) मातृसदृशः | ब ) मातरिसदृशः | स ) मातुः सदृशः |
| 7. | भद्रे ! नूनम् \| सहस्रात् अधिकं ( तेषु ) पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम् ? | अ ) सहस्राधिके | ब ) सहस्राधिकेषु | स ) सहस्राधिका |
| 8. | महानगरमध्ये जीवनं कष्टं जातम् \| | अ ) महानगरेषु मध्ये | ब ) महानगराणां मध्ये | स ) महानगरं मध्ये |
| 9. | अहं ( कविः ) मानवाय जीवनं कामये \| | अ ) मानवजीवनम् | ब ) मानवजीवने | स ) मानवजीवनेन |

*************************************************************************************************************

विभक्ति - तत्पुरुषः | उत्तराणि :- गृहं गतः , जनहितं , व्याघ्रात् भीतः , जीवनरक्षां , शास्त्रेषु निपुणः , मातृसदृशः , सहस्राधिकेषु , महानगराणां मध्ये , मानवजीवनम् |

**************************************************************************************************************
*

2. अव्ययीभाव - समासः :- समस्तपदे पूर्वपदं अव्ययपदं भवति । समस्तपदं नपुंसकलिङ्ग - एकवचने भवति ।

अधः प्रदत्त - तालिकायाः आधारेण " अव्ययीभाव " समासस्य समस्तपद - स्वरूपं तथा विग्रहवाक्यस्य स्वरूपं च पश्यामः :-

| संख्या | अव्ययपदम् | अर्थ : | उत्तरपदे विभक्तिः | समस्तपदम् ( पूर्वपदं अव्ययम् ) | विग्रहवाक्यम्( उत्तरपदे अव्ययस्य अर्थः ) |
|---|---|---|---|---|---|
| 1 | अनु | पश्चात् / योग्यता | षष्ठी | अनुरूपम् / अनुरथम् | रूपस्य योग्यम् / रथस्य पश्चात् |

| | | | | | | |
|---|---|---|---|---|---|---|
| 2 | सह / स | सहितम् | तृतीया | सचक्रम् | चक्रेण | सहितम् |
| 3 | उप | समीपम् | षष्ठी | उपवृक्षम् | वृक्षस्य | समीपम् |
| 4 | निर् | अभाव: | षष्ठी | निर्जनम् | जनानाम् | अभाव: |
| 5 | प्रति | पदस्य द्विरुक्तम् | प्रथमा / सप्तमी | प्रत्येकम् / प्रतिगृहम् | एकम् एकम् / | गृहे गृहे |
| 6 | यथा | अनतिक्रम्य | द्वितीया | यथाशक्ति | शक्तिम् | अनतिक्रम्य |

विवरणम् :- क) समस्तपदे पूर्वपदम् अव्ययपदम् / उपसर्ग: भवति । यथा :- अनुरूपम् ( अनु पूर्वपदम् )
ख) अव्ययस्य अर्थ: विग्रहवाक्ये उत्तरपद० भवति । यथा :- रूपस्य योग्यम् ( अनु = योग्यम् )
ग) समस्तपदे उत्तरपदं , विग्रहवाक्ये पूर्वपदं भवति । तत्र च विभक्ति: भवति । यथा :- अनुरूपम् ( उत्तरपदम् - रूपम् / रूपस्य )
घ) समस्तपदं नपुंसकलिङ्ग - एकवचने भवति । यथा :- अनुरूपम् ( फल - फलम् / रूप - रूपम् )

**Q.NO.2.** अधोलिखित - वाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्त - विकल्पेभ्य: चित्वा लिखत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

1. <u>निर्गुणम्</u> अ ) गुणानां अभावः ब ) गुणानां पश्चात् स ) गुणानां समीपम्
2. <u>बलस्य अभावः</u> अ ) निर्बलम् ब ) निर्बलाः स ) निर्बलः
3. जनः तं <u>ससम्मानम्</u> गृहं प्रेषितवान् | अ ) सम्मानम् अनतिक्रम्य ब ) सम्मानेन सहितम् स ) सम्मानस्य समीपम्
4. वायुमण्डलं भृशं दूषितं न हि <u>निर्मलं</u> जलम् | अ ) मलस्य समीपम् ब ) मलस्य अभावः स ) मलस्य पश्चात्
5. <u>मलेन सहितं</u> धरातलम् | अ ) समला ब ) समल: स ) समलम्
6. वानरः <u>सगर्वं</u> वदति | अ ) गर्वं सहितम् ब ) गर्वस्य सहितम् स ) गर्वेण सहितम्
7. सर्वेषामेव मत्कृते महत्त्वं विद्यते <u>यथासमयम्</u> | अ ) समयं अनतिक्रम्य ब ) समयस्य पश्चात् स ) समयस्य समीपं

***************************************************************************************************************

अव्ययीभाव - समास: - उत्तराणि :- गुणानां अभावः , निर्बलम् , सम्मानेन सहितम् , मलस्य अभावः , समलम् , साट्टहासम् , गर्वेण सहितम् , समयं अनतिक्रम्य |

************************************************************************** ***************************************************************************************

3 . द्वन्द्व समास: :- चार्थे द्वन्द्व: | ( च = और , अर्थे = अर्थ में , द्वन्द्व: = द्वन्द्व समास । ) । इतरेतरद्वन्द्व: ।

विग्रहवाक्यस्य स्वरूपम् :- समस्तपदस्य स्वरूपम् :-

पूर्वपदम् च उत्तरपदम् च अन्यत् पदम् च समस्तपदम्

यथा :- राम: च कृष्ण: च ................ ..... रामकृष्णौ ( राम & कृष्ण - द्विवचनम् ) रामकृष्णौ ।

पत्रम् च फलम् च पुष्पम् च पत्रफलपुष्पाणि ( पत्रम् , फलम् & पुष्पम् ) पत्रफलपुष्पाणि ।

प्रथमे विग्रहवाक्ये अन्तिमपदं कृष्ण अस्ति अत: समस्तपदं ( पदसंख्यानुसारम् ) द्विवचने रामकृष्णौ ( दो पद राम & कृष्ण ) इति भवति ।

द्वितीये विग्रहवाक्ये अन्तिमपदं पुष्पम् अस्ति अत: समस्तपदं ( पदसंख्यानुसारम् ) बहुवचने पत्रफलपुष्पाणि ( तीन पद पत्रम्,फलम् ,पुष्पम् ) इति भवति ।

अभ्यास: :- रामलक्ष्मणौ :- ............... च .......................... च

रामलक्ष्मणभरता: :- ............... च .......................... च ........................ च

1. बलीवर्द: च बलीवर्द: च ( ताभ्याम् ) अ ) बलीवर्दौ ब ) बलीवर्देभ्य: स ) बलीवर्दाभ्याम्
2. बलीवर्द: च बलीवर्द: च ( तयो: ) अ ) बलीवर्दयो: ब ) बलीवर्दान् स ) बलीवर्दानाम्
3. प्रस्तरतले लतातरुगुल्मा: नो भवन्तु पिष्टा: | अ ) लतातरु: च गुल्मा: च ब ) लता: च तरव: च गुल्मा: च स ) लतानां तरुगुल्मा:
4. को भेद: पिककाकयो: ? अ ) पिक: च काक: च ब ) पिक: च काक: च , तं स ) पिक: च काक: च , तयो:
5. एतस्मिन् एव काले व्याघ्रचित्रकौ नदीजलं पातुम् आगतौ | अ ) व्याघ्रं च चित्रकं च ब ) व्याघ्रा: च चित्रका: च स ) व्याघ्र: च चित्रक: च

*********************************************************************************************************************

द्वन्द्व समास: - उत्तराणि :- बलीवर्दाभ्याम् , बलीवर्दयो: , लता: च तरव: च गुल्मा: च , पिक: च काक: च , तयो: , व्याघ्र: च चित्रक: च |

******************************************************************** ******************************************************************************

परीक्षायै अभ्यासार्थम् :- Q.NO. - 2 .अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्त - विकल्पेभ्य: चित्वा लिखत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

क) बाष्पमाला संधावति । बाष्पयानेषु माला / बाष्पयानेभ्य: माला / बाष्पयानानां माला

ख) तत्र राजसिंह: नाम राजपुत्र: वसति स्म । राज्ञ: पुत्र: / राज्ञा पुत्र: / राज्ञे पुत्र:

ग) तस्मिन्नेव काले व्याघ्रचित्रकौ अपि जलपानाय आगतौ । व्याघ्र: च चित्रक: च / व्याघ्र: च चित्रका: च / व्याघ्र: च चित्रकौ च

घ) जना: गङ्गाया: समीपम् गच्छन्ति | अनुगङ्गम् / उपगङ्गम् / यथागङ्गम्

ङ ) काक: अट्टहासेन सहितं प्रविशति | अट्टहाससहितम् / अट्टहासपूर्वकम् / साट्टहासम्

Q.NO.2. अधोलिखित - वाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्त - विकल्पेभ्य: चित्वा लिखत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

i ) अहं राष्ट्रपते: भवनं द्रष्टुं गच्छामि । ( क ) राष्ट्रपतेर्भवनम् ( ख ) राष्ट्रपतिभवनम् ( ग ) राष्ट्रपतभवनम्

ii ) नास्ति उद्यमसम: बंधु: । ( क ) उद्यमाय सम: ( ख ) उद्यमात् सम: ( ग ) उद्यमेन सम:

iii ) रामलक्ष्मणौ मिथिलाम् अगच्छताम् । ( क ) रामः च लक्ष्मणः च ( ख ) रामाः च लक्ष्मणाः च ( ग ) रामे च लक्ष्मणे च

iv ) विद्यालये छात्राः यथासमयम् क्रीडन्ति । ( क ) समयस्य योग्यम् ( ख ) समयं यथा ( ग ) समयम् अनतिक्रम्य

v ) समस्तं धरातलम मलेन सहितं जातम् । ( क ) अनुमलम् ( ख ) समलम् ( ग ) उपमलम्

पाठः - 1. 6. Q.2. यथा :- क. मलेन सहितम् = समलम् ( अव्ययीभाव )

************************************************************************************************************************************

Q.NO.3. प्रत्यया: :- 4 | * तद्धितप्रत्ययौ - मतुप् , त्व । 3 अङ्काः * स्त्रीप्रत्यय: - टाप् । 1 अङ्कः

************************************************************************************************************************************

तद्धित - प्रत्ययाः :- शब्द + प्रत्यय ( तद्धित - प्रत्यय ) = प्रत्यायान्त - पदम् । ( प्रत्ययान्तपदानि विशेषणपदानि इव प्रयुज्यन्ते |
अतः विशेष्यपदस्य लिङ्ग - विभक्ति - वचन - अनुसारम् एव प्रत्ययान्तपदानां ( विशेषणपदानां ) प्रयोगः भवति |

1. मतुप् = युक्त / सहित / WITH - अर्थे प्रयुज्यते ।

क) मतुप् प्रत्ययस्य शेष: - " वान् " अकारान्त / आकारान्त शब्देन सह आगच्छति ।

यथा :- धन ( अकारान्त: शब्द: ) + मतुप् = धनवान् , गुणवान् आदि ..... विद्या ( आकारान्त शब्द: ) + मतुप् = विद्यावान् आदि ...

ख) मतुप् प्रत्ययस्य शेष: - " मान् " अकारान्त / आकारान्त भिन्न - स्वरान्त - शब्देन सह आगच्छति ।

यथा :- शक्ति ( इकारान्त: शब्द: ) + मतुप् = शक्तिमान् , बुद्धिमान् आदि ....

प्रत्ययान्त - पदानि विशेषण - शब्दरूपाणि इव ( = की तरह / Like ) प्रयुज्यन्ते । * अत: मतुप् प्रत्ययान्त - पदानि त्रिषु लिङ्गेषु भवन्ति । पश्याम: :-

| | | | | |
|---|---|---|---|---|
| I. | * अकारान्त - शब्दै: सह पुंलिङ्गे - | वान् | वन्तौ | वन्त: |
| | यथा :- गुण + मतुप् = | गुणवान् | गुणवन्तौ | गुणवन्त: |
| | पुंल्लिंगें - भवत् शब्दवत् - | भवान् | भवन्तौ | भवन्त: ( एवं रूपाणि भवन्ति । ) |
| | स्त्रीलिङ्गे - | वती | वत्यौ | वत्य: |
| | यथा :- गुण + मतुप् = | गुणवती | गुणवत्यौ | गुणवत्य: |

| | | | | |
|---|---|---|---|---|
| स्त्रीलिंगे - नदी शब्दवत् - | नदी | नद्यौ | नद्य: | ( एवं रूपाणि भवन्ति । ) |
| नपुंसकलिङ्गे- | वत् | वती | वन्ति | |
| यथा :- गुण + मतुप् = | गुणवत् | गुणवती | गुणवन्ति | |
| नपुंसकलिंगे - जगत् शब्दवत्- | जगत् | जगती | जगन्ति | ( एवं रूपाणि भवन्ति । ) |

II. * " अ " / " आ " भिन्न - अन्य – स्वरान्त - शब्दै: सह -

| | | | | |
|---|---|---|---|---|
| पुंलिङ्गे - | मान् | मन्तौ | मन्त: | |
| यथा :- बुद्धि + मतुप् = | बुद्धिमान् | बुद्धिमन्तौ | बुद्धिमन्त: | |
| पुंल्लिंगें - भवत् शब्दवत् - | भवान् | भवन्तौ | भवन्त: | ( एवं रूपाणि भवन्ति । ) |
| स्त्रीलिङ्गे - | मती | मत्यौ | मत्यः | |
| यथा :- बुद्धि + मतुप् = | बुद्धिमती | बुद्धिमत्यौ | बुद्धिमत्य: | |
| स्त्रीलिंगे - नदी शब्दवत् - | नदी | नद्यौ | नद्य: | ( एवं रूपाणि भवन्ति । ) |
| नपुंसकलिङ्गे - | मत् | मती | मन्ति | |
| यथा :- बुद्धि + मतुप् = | बुद्धिमत् | बुद्धिमती | बुद्धिमन्ति | |
| नपुंसकलिंगे - जगत् शब्दवत्- | जगत् | जगती | जगन्ति | ( एवं रूपाणि भवन्ति । ) |

*****************************************************************************************************************************

2) त्व = धर्म / समूहार्थे । * "त्व " प्रत्ययस्य शेष: पदेन सह " त्वम् " भवति । * अस्य रूपाणि पुष्प - नपुंसकलिङ्गवत् भवन्ति ।

यथा :- मानव + त्व = मानवत्वम् । महत् + त्व = महत्त्वम् । पशु + त्व = पशुत्वम् ।

*****************************************************************************************************************************

* स्त्रीप्रत्यय: - टाप् । 1 अङ्कः | पुंल्लिङ्ग - शब्दः + स्त्री प्रत्ययः = स्त्रीलिङ्ग - शब्दरूपम् |

1. " टाप् " प्रत्ययस्य शेष: " आ " भवति , तथा " आ " पदस्यान्ते आगच्छति / युज्यते । यथा - अज + टाप् = अजा

( " अज " पुंल्लिंगशब्द: + " टाप् " प्रत्ययेन = " अजा " इति स्त्रीलिंग - शब्द: जात: । )

I. * अक - अन्त - पुंलिङ्ग - शब्दानां कृते अन्ते " इका " भवति । अस्य रूपाणि " लतावत् " भवन्ति ।

यथा :- बालक + टाप् = बालिका । मूषक + टाप् = मूषिका ।

( ' अक ' अन्त पुंल्लिंगशब्द: + " टाप् " प्रत्ययेन = " इका " अन्त - स्त्रीलिंग - शब्द: जात: )

****************************************************************************************************

3. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति - प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत ।

| | | | | |
|---|---|---|---|---|
| i ) | वर्षाकाले प्रकृतिः <u>मनोहर + टाप्</u> भवति । | ( क ) मनोहर: | ( ख ) मनोहरी | ( ग ) मनोहरा |
| ii ) | लोकेऽस्मिन् पण्डिताः <u>चक्षुष् + मतुप्</u> प्रकीर्तिता: । | ( क ) चक्षुष्मान् | ( ख ) चक्षुष्मन्त: | ( ग ) चक्षुष्मन्तौ |
| iii ) | मत्कृते सर्वेषामेव <u>महत्त्वं</u> विद्यते । | ( क ) महत् + त्वम् | ( ख ) महत् + अम् | ( ग ) महत् + त्व |
| iv ) | लोके <u>धैर्य + मतुप्</u> विजयं प्राप्नोति । | ( क ) धैर्यमान् | ( ख ) धैर्यवन्तः | ( ग ) धैर्यवान् |

****************************************************************************************************

विशेष्यपदानि / CLUE पदानि अनुसृत्य प्रकृति - प्रत्ययान्तरूपं लिखन्तु । यथा :- उपरि प्रश्नेषु CLUE पदानि माला , विद्वांसः , विद्यते , गङ्गा ।

****************************************************************************************************

Q.NO.4. वाच्यस्य नियमानुगुणम् उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत - ( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

CBSE निर्धारित - भाग: :- 1. कर्तृ - वाच्यम् , & 2. कर्म - वाच्यम् , वाच्यपरिवर्तनम् :- केवलं लट् लकारे ( कर्तृ , कर्म , क्रिया )

वाच्यम् नाम किम् ? कथन - वैचित्र्यम् / वाक्यम् एव वाच्यं कथ्यते । पश्याम: :-

| वाच्यम् = “ कथनशैली ” । | त्रिविधं भवति :- 1. कर्तृ - वाच्यम् , 2. कर्म - वाच्यम् , & 3. भाव - वाच्यम् । |
|---|---|

**वाच्यम्**

- **कर्तृवाच्यम्**
  - कर्तृपदम् – प्रथमाविभक्तिः
  - कर्मपदम् – द्वितीयाविभक्तिः
  - क्रियापदम् – कर्तृपदस्य वचनानुसारम्
- **कर्मवाच्यम्**
  - कर्तृपदम् – ततीयाविभक्तिः
  - कर्मपदम् – प्रथमाविभक्तिः
  - क्रियापदम् – कर्मपदस्य वचनानुसारम्

नियम: :- वाक्ये / वाच्ये त्रायाणाम् पदानाम् ( कर्तृ , कर्म & क्रिया ) उपरि ध्यानं देयम् -

A . कर्तृवाच्ये वाक्यनिर्माणम् :- 1. कर्तृपदम् : - प्रथमा - विभक्तौ भवति । यथा :- राम: रामौ रामा:
2. कर्मपदम् :- द्वितीया - विभक्तौ भवति । यथा :- ग्रामं ग्रामौ ग्रामान्
3. क्रियापदम् :- ( प्रथम - पुरुषे ) गच्छति गच्छत: गच्छन्ति
( मध्यम - पुरुषे ) गच्छसि गच्छथ: गच्छथ
( उत्तम - पुरुषे ) गच्छामि गचछाव: गच्छाम:

( *** क्रियापदम् - कर्तृपदस्य पुरुषानुसारं वचनानुसारं च भवति । - ( Like - प्रथम - एकवचनं / द्वि / बहुवचनं / मध्यम / उत्तम - पुरुष: )

| अभ्यास: :- | वाक्ये - | कर्तृपदम् | कर्मपदम् | क्रियापदम् |
|---|---|---|---|---|
| वाक्यानि :- | 1. | राम: | ग्रामं | गच्छति । |
| | 2. | रमौ | ग्रामौ | गच्छत: । |
| | 3. | रामा: | ग्रामान् | गच्छन्ति । |

***** अत्र - कर्तृपदस्य ( राम: / रामौ / रामा: ) वचनानुसारं क्रियापदस्य प्रयोग: गच्छति / गच्छत: / गच्छन्ति इति भवति ।

***** अत: वाक्यम् " कर्तृ - वाच्यम् / वाक्यम् " कथ्यते । क्रियापदस्य प्रयोग: कर्तृपद - अनुसारम् एव भवति - अत: कर्तृवाच्यम् कथ्यते ।

*****************************************************************************************************************************************

B . इदानीं कर्मवाच्ये वाक्यनिर्माणम् पश्याम: :-

1. कर्तृपदम् : - तृतीया - विभक्तौ भवति । यथा :- रामेण रामाभ्याम् रामै:
2. कर्मपदम् :- प्रथमा - विभक्तौ भवति । यथा :- ग्राम: ग्रामौ ग्रामा:
3. क्रियापदम् :- ( कर्मपदस्य , पुरुषस्य वचनस्य च अनुसारं ) यथा :- गम्यते गम्येते गम्यन्ते

NOW / इदानीं कर्मवाच्ये क्रियापदस्य निर्माणम् पश्याम: :- गम् धातु: + यते + येते + यन्ते

क्रियापदम् - कर्मपदस्य पुरुषानुसारम् वचनानुसारम् च भवति । ( Like - प्रथम - एकवचनं / द्वि / बहुवचनं / मध्यम / उत्तम - पुरुष: )

| वाक्ये - | | कर्तृपदम् | कर्मपदम् | क्रियापदम् | |
|---|---|---|---|---|---|
| वाक्यानि :- | 1. | रामेण | ग्राम: | गम्यते । | ( ति to यते ) |
| | 2. | रमाभ्याम् | ग्रामौ | गम्येते । | ( त: to येते ) |

3. रामैः ग्रामाः गम्यन्ते । ( न्ति to यन्ते )

**** अत्र - कर्मपदस्य ( ग्रामः / ग्रामौ / ग्रामाः ) वचनानुसारं गम्यते / गम्येते / गम्यन्ते इति क्रियापदस्य प्रयोगः भवति ।

***** अतः वाक्यम् " कर्म - वाच्यम् / वाक्यम् " कथ्यते । क्रियापदस्य प्रयोगः कर्मपद - अनुसारम् एव भवति - अतः कर्मवाच्यम् कथ्यते ।

************************************************************************************************************************************************************************************************

| नियमस्य दृढीकरणम् - | कर्तृवाच्यम् | | | | कर्मवाच्यम् | | |
|---|---|---|---|---|---|---|---|
| | कर्तृ | कर्म | क्रिया | | कर्तृ | कर्म | क्रिया |
| | 1 | 2 | 1 | तः | 3 | 1 | 1 |
| | प्रथमा-वि | द्वितीया-वि | कर्तृपद-वचनानुसारम् | - | तृतीया-वि | प्रथमा-वि | कर्मपद- वचनानुसारम् |

संख्यास्थाने विभक्तिम् अवगच्छन्तु - यथा :- 1 = प्रथमा विभक्तिः / 3 = तृतीया विभक्तिः / 2 = द्वितीया विभक्तिः &

K 1 = क्रियापदम् , वाक्ये प्रथमा - विभक्ति - पदस्य पुरुषानुसारं वचनानुसारं च भवति ।

| | कर्तृवाच्ये | | | | | कर्मवाच्ये | |
|---|---|---|---|---|---|---|---|
| | 1 | 2 | K1 | तः / to | 3 | 1 | K1 |
| अभ्यासः:- | रामः | फलं | खादति । | …… | रामेण | फलं | खाद्यते । |
